**अपांपित्त** °नपात् &c. &c. see under अप.

**अपामार्गः** [ अपमृज्यते व्याध्यादिरनेन इत्यपामार्गः, मृज् करणे घञ् कुत्वं दीर्घश्च P. III. 3. 121 Sk. ] N. of a plant Achyranthes Aspera (Mar. आघाडा) largely used in medicine, washing teeth, sacrificial and other religious purposes and in incantations; अपामार्ग त्वया वयं सर्वं तदपमृज्महे; अपामार्ग ओषधीनां सर्वासामेक इद्वशी। Av. –**Comp.** –**क्षारतैलम्**, –**तैलम्** N. of two medicated oils.

**अपामार्जनम्** Cleansing, purifying, removing (diseases, evils &c).

**अपाय** –**यिन्** See under अपे.

**अपार** *a.* 1 Shoreless. –2 Boundless, unbounded, unlimited; अपारस्याप्रमेयस्य परं पारमुपाश्रिते Rām. unfathomable, of great length. –3 Inexhaustible, immense, great (अधिक); अपारो वो महिमा Rv. 5. 87. 6. –4 Out of reach. –5 Difficult to be crossed; difficult to be surmounted or overcome (as an enemy); रावणश्च महाशत्रुरपारः प्रतिभाति मे। Rām. –**रः** An ocean; कर्णधार इवापारे भगवान्पारदर्शकः Bhāg. 1. 13. 39. –**रम्** 1 A kind of mental satisfaction or acquiescence; or, reverse of mental acquiescence, non-acquiescence. –2 The opposite bank of a river. –**रा** The earth. –**पार** *a.* Carrying over the boundless sea.

**अपारक** *a.* Unable, incompetent.

**अपारवार** *a.* Boundless; अपारवारमक्षोभ्यं गाम्भीर्यात्सागरोपमम् Rām. 5. 38. 40.

**अपार्ण** *a.* [ अप–अर्द्–क्त निपातः ] 1 Distant, remote, far. –2 Near.

**अपार्थ** [ अप–अर्थ ], **अपार्थक** *a.* 1 Useless, unprofitable, worthless; सर्वमेतदपार्थं ते क्षिप्रं तौ संप्रसादय Mb. –2 Meaningless, unmeaning, senseless; अपार्थं बहु भाषते Suśr. –**र्थम्** Senseless or incoherent talk or argument (regarded as one of the faults of composition in rhetoric); योग्यतासत्त्याकाङ्क्षाशून्यं वाक्यम् Gautama; पौर्वापर्यायोगादप्रतिबन्धार्थमपार्थकम्; cf. also Kāv. 3. 128; समुदायार्थशून्यं यत्तदपार्थमितीष्यते। –2 uselessness; तेषां श्रमो ह्यपार्थाय यदात्मा नादृतः स्वयम् Bhāg. 3. 13. 13. –*ind.* In vain, unprofitably; स्वयं सधर्मा अपि शोचन्त्यपार्थम् Bhāg. 7. 2. 37. –**Comp.** –**करणम्** advancing a false plea in a law-suit.

**अपार्थिव** *a.* Not earthly.

**अपालङ्कः** N. of a plant, Cassia Fistula. आरग्वध (Mar. बाहवा).

**अपालम्बः** Ved. The hinder part of a carriage.

**अपावृ** 5 P. 1 To open, lay bare or open, unveil, uncover; expose, display, reveal; (शयनम्) तस्य विभ्रमरतान्यपावृणोत् R. 19. 25. –2 To cover.

**अपावृत** *p. p.* 1 Opened, laid bare or open; राधो विश्वायु शवसे अपावृतम् Rv. 1. 57. 1. स्वर्गद्वारमपावृतम् Bg. 2. 32. –2 Covered, concealed; enclosed. –3 Free, unrestrained, self-willed.

**अपावृतिः** *f.*, **अपावरणम्** 1 Opening, laying bare or open. –2 Covering, enclosing, surrounding. –3 Concealing, hiding, screening.

**अपावृत्** 1 A. 1 To turn away, return, turn back; to turn away from, abstain or desist from. –2 To come to nothing. –*Caus.* To send back, turn back; to reject, repulse.

**अपावर्तनम्**, –**वृत्तिः** *f.* 1 Turning away or from, retreating, retiring; repulse, rejection. –2 Revolution.

**अपावृत्त** *p. p.* 1 (With abl.) Turned away from, averted, reversed, repelled, driven back, defeated; कथं द्रक्ष्याम्यपावृत्तां परैरिव हतां चमूम् Rām. 2. 12. 64. –2 (Actively used) Dismissing, scorning, rejecting with contempt; प्रतिग्रहादपावृत्तः सन्तुष्टो येन केन चित् Mb. –**त्तम्** 1 Rolling on the ground (of a horse). –2 Moving aside (a war manouvre); परावृत्तमपावृत्तमपद्रुतमवप्लवम् Rām. 6. 40. 25.

**अपाश्या** Not a large number of snares, *i. e.* a few snares; ययतोश्चातदर्थे P. VI. 2. 156. Sk.

**अपाश्रि** 1 U. 1 To resort to, betake oneself to; परस्परं केचिदपाश्रयन्ते Rām. –2 To use, practise, employ; आहारमनपाश्रित्य शरीरस्येव धारणम् Mb. –3 To rest on, lie on (intrans.).

**अपाश्रय** *a.* Without support or refuge, helpless. –**यः** 1 Refuge, recourse, that to which recourse is had for refuge; कर्णे कृतापाश्रयः Ve. 5. 1. –2 An awning or canopy spread over a courtyard. –3 Head; त्वदङ्कापाश्रयां ताम् Dk. 34, 69.

**अपाश्रित** *p. p.* 1 (Passively used) (*a*) Restored to. (*b*) Girt round, fastened. (*c*) Inhabited by. –2 (Actively used) Resting or reposing on, resorting to, entering on or into, being in or under.

**अपाष्ठिः** *f.* Ved. The heel.

**अपाष्ठः** [ स्था–क; सस्य षत्वम् ] Ved. The barb or point of an arrow. –**ष्ठम्** The remainder of the Soma plant after it has been pressed out; °वत् barbed.

**अपास्** [ अप्–अस् ] 4 P. 1 (*a*) To throw or fling away, cast away or off, leave, keep or put aside, reject, discard (opinion also); सारं ततो ग्राह्यमपास्य फल्गु Pt. 1. 5; किमित्यपास्याभरणानि यौवने धृतं त्वया वार्धकशोभि वल्कलम् Ku.5.44; निरस्तगाम्भीर्यमपास्तपुष्पकम् Śi. 1. 55; इत्यादीनामपि काव्यलक्षणत्वमपास्तम् S. D. rejected, discarded. (b) To leave, abandon, desert, quit, retire or withdraw from; यदि समरमपास्य नास्ति मृत्योर्भयम् Ve. 3. 5. –2 To scare, disperse, drive away; अपास्य चास्य यन्तारम् Mb. –3 To leave behind, leave in a deserted condition; to disregard, take no notice of, condemn.

**अपासनम्** 1 Throwing away, discarding. –2 Quitting. –3 Killing.